# Vaibhavalakshmi Archana or Mahalakshmi Stavam

# શ્રીવૈભવલક્ષ્મી અર્ચના અથવા મહાલક્ષ્મીસ્તવમ્

## Document Information

Text title : Vaibhavalkshmi Archana

File name : vaibhavalkShmiarchanA.itx

Category : devii, nAmAvalI, devI, lakShmI, aShTottarashatanAmAvalI

Location : doc_devii

Proofread by : PSA Easwaran

Latest update : December 22, 2020

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 14, 2023

*sanskritdocuments.org*

# શ્રીવૈભવલક્ષ્મી અર્ચના અથવા મહાલક્ષ્મીસ્તવમ્

શ્રીપાર્વતિ સરસ્વતિ મહાલક્ષ્મિ નમોઽસ્તુ તે ।
વિષ્ણુપ્રિયે મહામાયે મહાલક્ષ્મિ નમોઽસ્તુ તે ।
કમલે વિમલે દેવિ મહાલક્ષ્મિ નમોઽસ્તુ તે ।
કારુણ્યનિલયે દેવિ મહાલક્ષ્મિ નમોઽસ્તુ તે ।
દારિદ્ર્યદુઃખશમનિ મહાલક્ષ્મિ નમોઽસ્તુ તે ।
શ્રીદેવિ નિત્યકલ્યાણિ મહાલક્ષ્મિ નમોઽસ્તુ તે ।
સમુદ્રતનયે દેવિ મહાલક્ષ્મિ નમોઽસ્તુ તે ।
રાજલક્ષ્મિ રાજ્યલક્ષ્મિ મહાલક્ષ્મિ નમોઽસ્તુ તે ।
વીરલક્ષ્મિ વિશ્વલક્ષ્મિ મહાલક્ષ્મિ નમોઽસ્તુ તે ।
મૂકહન્ત્રિ મન્ત્રરૂપે મહાલક્ષ્મિ નમોઽસ્તુ તે । ૧૦
મહિષાસુરસંહર્ત્રિ મહાલક્ષ્મિ નમોઽસ્તુ તે ।
મધુકૈટભવિદ્રાવે મહાલક્ષ્મિ નમોઽસ્તુ તે ।
શઙ્ખચક્રગદાહસ્તે મહાલક્ષ્મિ નમોઽસ્તુ તે ।
વૈકુણ્ઠહૃદયાવાસે મહાલક્ષ્મિ નમોઽસ્તુ તે ।
પક્ષીન્દ્રવાહને દેવિ મહાલક્ષ્મિ નમોઽસ્તુ તે ।
ધાન્યરૂપે ધાન્યલક્ષ્મિ મહાલક્ષ્મિ નમોઽસ્તુ તે ।
સ્વર્ણરૂપે સ્વર્ણલક્ષ્મિ મહાલક્ષ્મિ નમોઽસ્તુ તે ।
વિત્તરૂપે વિત્તલક્ષ્મિ મહાલક્ષ્મિ નમોઽસ્તુ તે ।
હરિપ્રિયે વેદરૂપે મહાલક્ષ્મિ નમોઽસ્તુ તે ।
ફલરૂપે ફલધાત્રિ મહાલક્ષ્મિ નમોઽસ્તુ તે । ૨૦
નિસ્તુલે નિર્મલે નિત્યે મહાલક્ષ્મિ નમોઽસ્તુ તે ।
રત્નરૂપે રત્નલક્ષ્મિ મહાલક્ષ્મિ નમોઽસ્તુ તે ।
ક્ષીરરૂપે ક્ષીરધાત્રિ મહાલક્ષ્મિ નમોઽસ્તુ તે ।
વેદરૂપે નાદરૂપે મહાલક્ષ્મિ નમોઽસ્તુ તે ।
પ્રાણરૂપે પ્રાણમૂર્તે મહાલક્ષ્મિ નમોઽસ્તુ તે ।

પ્રણવાનન્દમહસે મહાલક્ષ્મિ નમોઽસ્તુ તે ।
બ્રહ્મરૂપે બ્રહ્મધાત્રિ મહાલક્ષ્મિ નમોઽસ્તુ તે ।
જાતવેદસ્વરૂપિણ્યૈ મહાલક્ષ્મિ નમોઽસ્તુ તે ।
આધારશક્તિનિલયે મહાલક્ષ્મિ નમોઽસ્તુ તે ।
સુષુમ્નાસુષિરાન્તસ્થે મહાલક્ષ્મિ નમોઽસ્તુ તે । ૩૦
યોગાનન્દપ્રદાયિન્યૈ મહાલક્ષ્મિ નમોઽસ્તુ તે ।
સૌન્દર્યરૂપિણિ દેવિ મહાલક્ષ્મિ નમોઽસ્તુ તે ।
સિદ્ધલક્ષ્મિ સિદ્ધરૂપે મહાલક્ષ્મિ નમોઽસ્તુ તે ।
સર્વસન્તોષસદ્રૂપે મહાલક્ષ્મિ નમોઽસ્તુ તે ।
તુષ્ટિદે પુષ્ટિદે દેવિ મહાલક્ષ્મિ નમોઽસ્તુ તે ।
રાજરાજાર્ચિતપદે મહાલક્ષ્મિ નમોઽસ્તુ તે ।
સર્વસ્વરૂપે દિવ્યાઙ્ગિ મહાલક્ષ્મિ નમોઽસ્તુ તે ।
ચારિત્ર્યદિવ્યશુદ્ધાઙ્ગિ મહાલક્ષ્મિ નમોઽસ્તુ તે ।
વેદગુહ્યે શુભે દેવિ મહાલક્ષ્મિ નમોઽસ્તુ તે ।
ધર્માર્થકામરૂપિણ્યૈ મહાલક્ષ્મિ નમોઽસ્તુ તે । ૪૦
મોક્ષસામ્રાજ્યનિલયે મહાલક્ષ્મિ નમોઽસ્તુ તે ।
સર્વગમ્યે સર્વરૂપે મહાલક્ષ્મિ નમોઽસ્તુ તે ।
મોહિનિ મોહરૂપિણ્યૈ મહાલક્ષ્મિ નમોઽસ્તુ તે ।
પઞ્ચભૂતાન્તરાલસ્થે મહાલક્ષ્મિ નમોઽસ્તુ તે ।
નારાયણપ્રિયતમે મહાલક્ષ્મિ નમોઽસ્તુ તે ।
કારણિ કાર્યરૂપિણ્યૈ મહાલક્ષ્મિ નમોઽસ્તુ તે ।
અનન્તતલ્પશયને મહાલક્ષ્મિ નમોઽસ્તુ તે ।
લોકૈકજનનિ વન્દ્યે મહાલક્ષ્મિ નમોઽસ્તુ તે ।
શમ્ભુરૂપે શમ્ભુમુદ્રે મહાલક્ષ્મિ નમોઽસ્તુ તે ।
બ્રહ્મરૂપે બ્રહ્મમુદ્રે મહાલક્ષ્મિ નમોઽસ્તુ તે । ૫૦
વિષ્ણુરૂપે વિષ્ણુમાયે મહાલક્ષ્મિ નમોઽસ્તુ તે ।
આજ્ઞાચક્રાબ્જનિલયે મહાલક્ષ્મિ નમોઽસ્તુ તે ।
ફકાર રેફ શક્ત્યાભે મહાલક્ષ્મિ નમોઽસ્તુ તે ।
હૃદયામ્બુજદીપાઙ્ગિ મહાલક્ષ્મિ નમોઽસ્તુ તે ।
વિષ્ણુગ્રન્થિ વિશાલાઙ્ગિ મહાલક્ષ્મિ નમોઽસ્તુ તે ।
આધારમૂલનિલયે મહાલક્ષ્મિ નમોઽસ્તુ તે ।
બ્રહ્મગ્રન્થિ પ્રકાશાઙ્ગિ મહાલક્ષ્મિ નમોઽસ્તુ તે ।

કુણ્ડલીશયનાનન્દિ મહાલક્ષ્મિ નમોઽસ્તુ તે ।
જીવાત્મારુપિણિ માતઃ મહાલક્ષ્મિ નમોઽસ્તુ તે ।
સ્થૂલસૂક્ષ્મપ્રકાશસ્થે મહાલક્ષ્મિ નમોઽસ્તુ તે । ૬૦
બ્રહ્માણ્ડભાણ્ડજનનિ મહાલક્ષ્મિ નમોઽસ્તુ તે ।
અશ્વત્થવૃક્ષસન્તુષ્ટે મહાલક્ષ્મિ નમોઽસ્તુ તે ।
કારુણ્યપૂર્ણે શ્રીદેવિ મહાલક્ષ્મિ નમોઽસ્તુ તે ।
મૂર્તિત્રયસ્વરોપિણ્યૈ મહાલક્ષ્મિ નમોઽસ્તુ તે ।
ભાનુમણ્ડલમધ્યસ્તે મહાલક્ષ્મિ નમોઽસ્તુ તે ।
સૂર્યપ્રકાશરૂપિણ્યૈ મહાલક્ષ્મિ નમોઽસ્તુ તે ।
ચન્દ્રમણ્ડલમધ્યસ્તે મહાલક્ષ્મિ નમોઽસ્તુ તે ।
વહ્નિમણ્ડલમધ્યસ્તે મહાલક્ષ્મિ નમોઽસ્તુ તે ।
પીતામ્બરધરે દેવિ મહાલક્ષ્મિ નમોઽસ્તુ તે ।
દિવ્યાભરણશોભાઁગે મહાલક્ષ્મિ નમોઽસ્તુ તે । ૭૦
બ્રહ્મણાઽઽરાધિતે દેવિ મહાલક્ષ્મિ નમોઽસ્તુ તે ।
નારસિંહિકૃપાસિન્ધો મહાલક્ષ્મિ નમોઽસ્તુ તે ।
વરદે મઙ્ગલમાન્યે મહાલક્ષ્મિ નમોઽસ્તુ તે ।
પદ્માટવિનિલયને મહાલક્ષ્મિ નમોઽસ્તુ તે ।
વ્યાસાદિ દિવ્યાઙ્ગસમ્પૂજ્યે મહાલક્ષ્મિ નમોઽસ્તુ તે ।
જયલક્ષ્મિ સિદ્ધલક્ષ્મિ મહાલક્ષ્મિ નમોઽસ્તુ તે ।
રાજમુદ્રે વિષ્ણુમુદ્રે મહાલક્ષ્મિ નમોઽસ્તુ તે ।
સર્વાર્થસાધકિ નિત્યે મહાલક્ષ્મિ નમોઽસ્તુ તે ।
હનુમદ્શક્તિસન્તુષ્ટે મહાલક્ષ્મિ નમોઽસ્તુ તે ।
મહતિ ગીતનાદસ્થે મહાલક્ષ્મિ નમોઽસ્તુ તે । ૮૦
રતિરૂપે રમ્યરૂપે મહાલક્ષ્મિ નમોઽસ્તુ તે ।
કામાઙ્ગિ કામ્યજનનિ મહાલક્ષ્મિ નમોઽસ્તુ તે ।
સુધાપૂર્ણે સુધારૂપે મહાલક્ષ્મિ નમોઽસ્તુ તે ।
ઇન્દ્રવન્દ્યે દેવલક્ષ્મિ મહાલક્ષ્મિ નમોઽસ્તુ તે ।
અષ્ટૈશ્વર્યસ્વરૂપિણ્યૈ મહાલક્ષ્મિ નમોઽસ્તુ તે ।
ધર્મરાજસ્વરૂપિણ્યૈ મહાલક્ષ્મિ નમોઽસ્તુ તે ।
રક્ષોવરપુરિલક્ષ્મિ મહાલક્ષ્મિ નમોઽસ્તુ તે ।
રત્નાકરપ્રભારમ્યે મહાલક્ષ્મિ નમોઽસ્તુ તે ।
મરુત્પુરમહાનન્દે મહાલક્ષ્મિ નમોઽસ્તુ તે ।

કુબેરલક્ષ્મિ માતઙ્ગિ મહાલક્ષ્મિ નમોઽસ્તુ તે । ૯૦
ઈશાનલક્ષ્મિ સર્વેશિ મહાલક્ષ્મિ નમોઽસ્તુ તે ।
બ્રહ્મપીઠે મહાપીઠે મહાલક્ષ્મિ નમોઽસ્તુ તે ।
માયાપીઠસ્થિતે દેવિ મહાલક્ષ્મિ નમોઽસ્તુ તે ।
શ્રીચક્રવાસિનિ કન્યે મહાલક્ષ્મિ નમોઽસ્તુ તે ।
અષ્ટભૈરવસમ્પૂજ્યે મહાલક્ષ્મિ નમોઽસ્તુ તે ।
અસિથાઙ્ગપુરીનાથે મહાલક્ષ્મિ નમોઽસ્તુ તે ।
સિદ્ધલક્ષ્મિ મહાવિદ્યે મહાલક્ષ્મિ નમોઽસ્તુ તે ।
બુદ્ધીન્દ્રિયાદિનિલયે મહાલક્ષ્મિ નમોઽસ્તુ તે ।
રોગદારિદ્ર્યશમનિ મહાલક્ષ્મિ નમોઽસ્તુ તે ।
મૃત્યુસન્તાપનાશિન્યૈ મહાલક્ષ્મિ નમોઽસ્તુ તે । ૧૦૦
પતિપ્રિયે પતિવ્રતે મહાલક્ષ્મિ નમોઽસ્તુ તે ।
ચતુર્ભુજે કોમલાઙ્ગિ મહાલક્ષ્મિ નમોઽસ્તુ તે ।
ભક્ષ્યરૂપે ભુક્તિધાત્રિ મહાલક્ષ્મિ નમોઽસ્તુ તે ।
સદાઽઽનન્દમયે દેવિ મહાલક્ષ્મિ નમોઽસ્તુ તે ।
ભક્તિપ્રિયે ભક્તિગમ્યે મહાલક્ષ્મિ નમોઽસ્તુ તે ।
સ્તોત્રપ્રિયે રમે રામે મહાલક્ષ્મિ નમોઽસ્તુ તે ।
રામનામપ્રિયે દેવિ મહાલક્ષ્મિ નમોઽસ્તુ તે ।
ગઙ્ગાપ્રિયે શુદ્ધરૂપે મહાલક્ષ્મિ નમોઽસ્તુ તે ।
વિશ્વભર્ત્રિ વિશ્વમૂર્તે મહાલક્ષ્મિ નમોઽસ્તુ તે ।
કૃષ્ણપ્રિયે કૃષ્ણરૂપે મહાલક્ષ્મિ નમોઽસ્તુ તે । ૧૧૦
ગીતારૂપે રાગમૂર્તે મહાલક્ષ્મિ નમોઽસ્તુ તે ।
સાવિત્રિ ભૂતસાવિત્રિ મહાલક્ષ્મિ નમોઽસ્તુ તે ।
ગાયત્રિ બ્રહ્મગાયત્રિ મહાલક્ષ્મિ નમોઽસ્તુ તે ।
બ્રાહ્મિ સરસ્વતિ દેવિ મહાલક્ષ્મિ નમોઽસ્તુ તે ।
શુકપાલિનિ શુદ્ધાઙ્ગિ મહાલક્ષ્મિ નમોઽસ્તુ તે ।
વીણાધરસ્તોત્રગમ્યે મહાલક્ષ્મિ નમોઽસ્તુ તે ।
આજ્ઞાકારિ પ્રાજ્ઞવન્દ્યે મહાલક્ષ્મિ નમોઽસ્તુ તે ।
વેદાઙ્ગવનસારાઙ્ગિ મહાલક્ષ્મિ નમોઽસ્તુ તે ।
નાદાન્તરાસભૂયિષ્ઠે મહાલક્ષ્મિ નમોઽસ્તુ તે ।
દિવ્યશક્તિ મહાશક્તિ મહાલક્ષ્મિ નમોઽસ્તુ તે । ૧૨૦
નૃત્તપ્રિયે નૃત્તલક્ષ્મિ મહાલક્ષ્મિ નમોઽસ્તુ તે ।

ચતુષ્ષષ્ઠિકલારૂપે મહાલક્ષ્મિ નમોઽસ્તુ તે ।
સર્વમઙ્ગલસમ્પૂર્ણે મહાલક્ષ્મિ નમોઽસ્તુ તે ।
દિવ્યગન્ધાઙ્ગરાગાઙ્ગિ મહાલક્ષ્મિ નમોઽસ્તુ તે ।
મુક્તિદે મુક્તિદેહસ્થે મહાલક્ષ્મિ નમોઽસ્તુ તે ।
યજ્ઞસારાર્થશુદ્ધાઙ્ગિ મહાલક્ષ્મિ નમોઽસ્તુ તે । ૧૨૬

ઇતિ વૈભવલક્ષ્મી અર્ચના સમાપ્તા ।

Proofread by PSA Easwaran

---

*Vaibhavalakshmi Archana or Mahalakshmi Stavam*

pdf was typeset on October 14, 2023

Please send corrections to *sanskrit@cheerful.com*